श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत् मैसूर् आण्डवन् श्री श्रीनिवासरामानुजमहादेशिकैः अनुगृहीता

# ॥ श्रीनिवासप्रपदनस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनिवासप्रपदनस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥
यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः।
वेदान्तलक्ष्मणमुनिः सन्निधत्तां सदा हृदि॥

कवेरकन्यासुतटेऽतिरम्ये श्रीवेणुगोपालसहाधिवासम्।
भक्तानुकम्पार्थकृतावतारं श्रीश्रीनिवासं शरणं प्रपद्ये॥ १ ॥

क्षेत्रे पवित्रे कृतशालिगोत्रे मुदा वसन्तं सकलेष्टदं हरिम्।
अपारसंसारसमुद्रसेतुं रमानिवासं शरणं प्रपद्ये॥ २ ॥

कावेरिकाकूलसुशालिशालि श्रीसोसलेनाम्नि पुरे वसन्तम्।
ददानमासेचनकं सुदर्शनं लक्ष्मीनिवासं शरणं वृणोऽहम्॥ ३ ॥

महीसुराराधितपादपद्मं पद्मानिवासं करुणालुमार्तिहम्।
अस्मद्गुरूदारपरंपराभिः संसेवितं तं शरणं व्रजामि॥ ४ ॥

नमस्ते नमस्ते कटिन्यस्तपाणे सदादर्शितात्मीयपादैकपाणे।
स्थिरां देहि भक्तिं भवत्पादपद्मे प्रदेहि श्रियं निश्चलां श्रीनिवास॥ ५ ॥

पञ्चपद्यां स्तुतिं भक्तिपद्यामाश्रित्य यः पठेत्।
गोपालगीतां सततं लभेतात्मेप्सितं फलम्॥ ६ ॥

॥ इति श्रीनिवासप्रपदनस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥